॥ हरिहरसुताष्टकम् ॥

हरिवरासनं विश्वमोहनं हरिदधीश्वरं आराध्यपाधुकम्।

अरिविमर्धनं नित्यनर्तनं हरिहरात्मजं देवमाश्रये॥ १

शरणं अय्यप्पा स्वामि शरणं अय्यप्पा

शरणं अय्यप्पा स्वामि शरणं अय्यप्पा

चरणकीर्तनं भक्तमानसं भरणलोलुपं नर्तनालसम्।

अरुणभासुरं भूतनायकं हरिहरात्मजं देवमाश्रये॥ २ शरणं

प्रणयसत्यकं प्राणनायकं प्रणतकल्पकं सुप्रभाञ्चितम्।

प्रणवमन्दिरं कीर्तनप्रियं हरिहरात्मजं देवमाश्रये॥ ३ शरणं

तुरगवाहनं सुन्दराननं वरगधायुधं वेदवर्णितम्।

गुरुकृपाकरं कीर्तनप्रियं हरिहरात्मजं देवमाश्रये॥ ४ शरणं

त्रिभुवनार्चितं देवतात्मकं त्रिनयनं प्रभुं दिव्यदेशिकम्।

त्रिदशपूजितं चिन्तितप्रदं हरिहरात्मजं देवमाश्रये॥ ५ शरणं

भवभयापहं भावुकावहं भुवनमोहनं भूतिभूषणम्

धवलवाहनं दिव्यवारणं हरिहरात्मजं देवमाश्रये॥ ६ शरणं

कलमृदुस्मितं सुन्दराननं कलभकोमलं गात्रमोहनम्

कलभकेसरी वाजिवाहनं हरिहरात्मजं देवमाश्रये॥ ७ शरणं

श्रितजनप्रियं चिन्तितप्रदं श्रुतिविभूषणं साधुजीवनम्

श्रुतिमनोहरं गीतलालसं हरिहरात्मजं देवमाश्रये॥ ८ शरणं